| | |
|---|---|
| चोरकः-रिका, | चुचोरयिषकः-षिका; |
| चोरयिता-त्री, | चुचोरयिषिता-त्री; |
| [A]चोरयन्-न्ती, | चुचोरयिषन्-न्ती; |
| चोरयिष्यन्-न्ती-ती, | चुचोरयिषिष्यन्-न्ती-ती; |
| चोरयमाणः, | चुचोरयिषमाणः; |
| चोरयिष्यमाणः, | चुचोरयिषिष्यमाणः; |
| [1]चोः-चोरौ-चोरः; | — |
| चोरितम्-तः, | चुचोरयिषितः-तवान्; |
| [2]चोरः चौरः, | चुचोरयिषुः; |
| चोरयितव्यम्, | चुचोरयिषितव्यम्; |
| चोरणीयम्; | चुचोरयिषणीयम्; |
| चोर्यम्, | चुचोरयिष्यम्; |
| ईषच्चोरः-दुश्चोरः-सुचोरः; | — |
| चोर्यमाणः, | चुचोरयिष्यमाणः; |
| चोरः, | चुचोरयिषः; |
| चोरयितुम्, | चुचोरयिषितुम्; |
| [3]चोरणा, [4]चुरा, व्यवचोरी,[5] | चुचोरयिषा; |
| चोरणम्, | चुचोरयिषणम्; |

---

1. णिनिमित्तके लघूपधगुणे, पदान्तरेफस्य विसर्गः।
2. चोर एव चौरः। 'प्रज्ञादिभ्यश्च' (5-4-38) इति स्वार्थेऽण् प्रत्ययः। पचादिषु (3-1-134) 'चोरट्' इति टित्करणेन पाठात् स्त्रियां ङीप्।
3. 'ण्यासश्रन्थो युच्' (3-3-107) इति युच्।
4. 'छत्रादिभ्यो णः' (4-4-62) इत्यत्र (गणे) 'चुरा' इति पाठात् अङ्, गुणाभावः, णिलोपश्च। चुरा शीलमस्या इत्यर्थे स्त्रियां चौरी। 'ताच्छीलिकेऽपि णेऽण्कृतं कार्यं भवति' (परिभाषा-88) इति वचनात् ङीप्।
5. 'कर्मव्यतीहारे णच् स्त्रियाम्' (3-3-43) इति णच्। 'णचस्त्रियामञ्' (5-4-14) इति अञ्। ङीप्। 'न कर्मव्यतीहारे' (7-3-6) इति ऐजागमनिषेधः।

A. 'सञ्चोरयन्तमरिगर्वमशेषभद्रं चिन्तन्तमन्तकमिवाप्तमयन्त्यवीर्यम्।' धा. का. 3.13.